# A-II/1/22AJDS2CCTC1/23

## द्वितीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-20)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. मार्गणा नाम किम्?
2. गोम्मटसारग्रन्थस्य रचयिता कः?
3. कतिविधाः मार्गणाः?
4. का गतिः? कति गतयः?
5. स्थावराः के भवन्ति?
6. पिपीलिकायां कति इन्द्रियाणि भवन्ति?
7. इन्द्रियस्य लक्षणं किम्?
8. कः योगः? कतिविधश्च?
9. वनस्पतिकायजीवानां परिग्रहणं कुत्र भवति? कतिविधाश्च ते जीवाः?
10. कषायः कः?
11. कतिविधाः लेश्याः?
12. "अनन्तानुबन्धि" इत्यस्य कोऽभिप्रायः?
13. सान्तमार्गणा नाम किम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. 'निगोद' इति विषयमवलम्ब्य लघुनिबन्धो लेखनीयः।
15. कृष्णलेश्यायाः स्वरूपं स्वामित्वं च प्रदर्श्यताम्।

16. मनोयोगमार्गणायाः स्वरूपं वर्ण्यताम्।

17. जीवस्य संसारदशा कथं भवति?

18. गतिमार्गणायाः संक्षेपेण प्रयोजनं लिखत।

19. कायविरहिताः जीवाः के भवन्ति? विवेचयताम्।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. कषायमार्गणायाः विस्तरेण वर्णनं लिखत।

21. कायलक्षणपुरस्सरं तद्भेदाः वर्णनीयाः।

22. इन्द्रियानिन्द्रियातीन्द्रियसुखविषये ग्रन्थाधारेण विवेचनं लिखत।

# A-II/2/22AJDS2CCTC2/23

## द्वितीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-21)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. कर्मणः त्रैविध्यं किं?
2. घातिकर्मणः नामानि कानि?
3. कर्मणः प्रकृतिः का? कति भेदाः तस्याः?
4. तीर्थंकरप्रकृतिः कस्य कर्मणः प्रकृतिः?
5. निषेकः कः?
6. कति विधः बन्धः?
7. समयप्रबद्धस्य का अवधारणा?
8. कषायेण कीदृशः बन्धः भवति?
9. प्रकृतिबन्धस्य कारणं किं?
10. गुणस्थानानि कानि?
11. का उदीरणा?
12. सङ्क्रमणं नाम किम्?
13. कर्मणां विवेचनं गोम्मटसारस्य कस्मिन् काण्डे निरूपितमस्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रदेशबन्धस्य स्वरूपं लेखनीयम्।
15. योगस्थानेषु अल्पबहुत्वनिर्देशः कार्यः।

16. स्थितिबन्धे आबाधाकालस्य किं स्वरूपम्?

17. दर्शनमोहनीयकर्मण: स्थिति: विवेचनीया। तत्कर्मण: स्वामिन: के?

18. अघातिकर्मणामनुभागबन्ध: लेखनीय:।

19. कर्मणां अष्टचत्वारिंशदुत्तरशतप्रकृतीनां नामानि लेखनीयानि।

**खण्ड: – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्न:) × 10 (अङ्क:) = 20**

20. कर्मण: दशकारणानि कानि? स्पष्टयत।

21. जैनकर्मसिद्धान्तस्य अवधारणा प्रयोजनं च लिखत।

22. गुणस्थानक्रमेण बन्धव्युच्छित्ते: विवरणं देयम्।

# A-II/3/22AJDS2CCTC3/23

## द्वितीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-22)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. ध्यानस्य लक्षणं किम्?
2. केवलज्ञानिनां ध्यानं कीदृशं भवति?
3. ध्यानं कतिविधम्? नामानि लिखत।
4. निर्वाणस्य कारणं किं ध्यानम्?
5. तिर्यञ्चगतेः मूलकारणं किं ध्यानम्?
6. ध्यानाय कः कालः उत्तमः?
7. अक्षयसुखं किम्?
8. लेश्याभावः कस्मिन् ध्याने भवति?
9. धर्मध्यानस्य लक्षणं किम्?
10. ध्यानयोग्यासनं किं भवति?
11. आर्तध्यानं हेयं वा उपादेयं वा?
12. ध्यानं कर्मेन्धनं कथं दहति?
13. शुक्लध्यानस्य भेदाः के सन्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. आर्तध्यानस्य सभेदं स्वरूपं वर्णयत।
15. रौद्रध्यानस्य स्वरूपं संक्षेपेण वर्णयत।

16. जीवे सदोषत्वं कस्मात् ध्यानानात् समायाति ?

17. रौद्रध्यानस्य प्रभावान् संक्षेपेण विवृणुत।

18. जैनदर्शनस्य ध्यानविषयकस्य एकस्य ग्रन्थस्य परिचयं लिखत।

19. मोक्षमार्गेध्यानस्य उपयोगित्वं किमिति विचारयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. धर्मध्यानस्य स्वरूपं विलिख्य तस्य उपयोगित्वमपि विस्तरेण वर्णयत।

21. जैनाभिमतस्य ध्यानस्य स्वरूपं विशदयत।

22. शुक्लध्यानं विस्तरेण वर्णयत।

# A-II/4/22AJDS2CCTC4/23

## द्वितीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-23)

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. कः आप्तः ?
2. सप्तभंगानि कानि सन्ति ?
3. निर्दोषसर्वज्ञः कः भवति ?
4. केषां स्वेष्टं प्रमाणेन बाध्यते ?
5. अभावानां नामानि लिखत।
6. बन्धः कः प्रोक्तः ?
7. वस्तुतत्त्वं कीदृशं भवति ?
8. सर्वज्ञः कर्मभूभृतां भेत्ता कथं भवति ?
9. 'नास्पृष्टः कर्मभिः शश्वद्विश्वदृश्वाऽस्ति कश्चन' अस्याः पंक्तेः कः अर्थः ?
10. सर्वज्ञसिद्धिः केन प्रमाणेन भवति ?
11. क्षणिकैकान्तस्य एकं दोषं लिखत।
12. कः सर्वथैकान्तं त्यजति ?
13. निर्दोषस्य आप्तस्य एकं वैशिष्ट्यं लिखत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. जैनाभिमतस्य आपतस्य मोक्षमार्गप्रणेतृत्वं वर्णयत।
15. सुगतः आप्तः न, कथम् ?

16. सांख्यमते कपिलो आप्तः स्वीकृतः, तत्र कथम् आप्तत्वस्य अभावः?

17. जैनाभिमतस्य आप्तस्य विश्वतत्त्वज्ञातृत्वं संक्षेपेण विशदयत।

18. आप्तपरीक्षाग्रन्थस्य दार्शनिकक्षेत्रे किं महत्त्वम्?

19. जैनाभिमतसर्वज्ञसिद्धिः संक्षेपेण विशदयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. जैनाभिमतस्य आप्तस्य स्वरूपं विस्तरेण विशदयत।

21. वैशेषिकमतस्य आप्तविचारः कः? तस्य च निरसनं कर्तव्यम्।

22. समन्तभद्राचार्यस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।